Shodhshauryam, International Scientific Refereed Research Journal
Available online at : www.shisrrj.com
© 2023 SHISRRJ | Volume 6 | Issue 5
ISSN : 2581-6306
doi : https://doi.org/10.32628/SHISRRJ

# गीतवीतरागेऽलङ्कारविमर्श:

जगदीश नस्कर
शोधच्छात्र:, अनुसन्धानप्रकाशनविभाग:, सहायकाचार्य:, सर्वकारीयशिक्षाशास्त्रमहाविद्यालय:, सहायकाचार्य:, गवर्नमेंट कॉलेज ऑफ एजुकेशन, वाणीपुरम्, पश्चिमबङ्ग:।

**Article Info**
**Publication Issue :**
September-October-2023
Volume 6, Issue 5
**Page Number :** 88-94
**Article History**
Received : 01 Sep 2023
Published : 29 Sep 2023

**सारांश:** - संस्कृतकाव्येषु गीतिकाव्यानामुच्चस्थानं वर्तते। गीतिकाव्येषु अन्यतमं वर्तते श्रीजयदेवेन विरचितं श्रीगीतगोविन्दम्। श्रीगीतगोविन्दस्य साहित्यकला – नैपुण्यमतीवसमृद्धं वर्तते। राधाकृष्णयो: प्रेमकथाधारेणएतत्काव्यं विरचितमस्ति। परवर्तिनि समये श्रीगीतगोविन्दगीतिकाव्यमाधारीकृत्य अनेकानि काव्यानि विरचितानि। एतेषु अन्यतममस्ति अभिनवचारुकीर्तिपण्डिताचार्येण विरचितं "गीतवीतरागगीतिकाव्यम्" वा "बाहुवलिस्वाम्यष्टपदी"। एतदेकं जैनकाव्यं भवति। अस्य काव्यस्य कर्ता अभिनवचारुकीर्तिपण्डिताचार्य: । काव्यमिदं सौन्दर्यशास्त्रदृष्ट्या सकलसहृदयहृदयग्राह्यं भवति। अत्र कविना सन्निवेशिता: अलङ्कारा: प्रतिपदमपूर्वं झङ्कारं सृजन्ति। शोधपत्रेऽस्मिन् अलङ्कारसिद्धान्तपरिशीलनपुरस्सरं केषाञ्चन अलङ्काराणां विचार: क्रियते ।

**कूटशब्दा:** – अलङ्कार:, उपमा, रूपकम्, उत्प्रेक्षा, सन्देह:, दृष्टान्त:, परिकर:, उल्लेख:, सङ्कर:, संसृष्टि:, गीतवीतराग:, अभिनवचारुकीर्ति: ।

अलङ्कारा: रसोपकारका: भवन्ति। काव्येऽलङ्कारस्य प्राधान्यं दण्डिना स्वीकृतम्। भामहाचार्य: कथयति– "न कान्तमपि निर्भूषं विभाति वनितानम्"[1] इत्युद्घोष्यालङ्कारस्यैव सर्वाधिकमहत्त्वं प्रतिष्ठापयामास। आचार्येण आनन्दवर्धनेनापि भामहस्य मतं समर्थयता उक्तं यत्–"यत: प्रथमं तावदतिशयोक्तिगर्भा सर्वालङ्कारेषु शक्यक्रिया कृतैव च सा महाकविभि: कामपि काव्यच्छविं पुष्यतीति कथं ह्यतिशययोगिता स्वविषयौचित्येन क्रियमाणा सती काव्ये नोत्कर्षमावहेत्"[2] इति । अलङ्कारसम्प्रदायसमर्थकाचार्येण दण्डिना उक्तं –

[1].भा.का.अ. – 1/13
[2].ध्वन्या – 3/37 कारिकायाम्

**Copyright © 2023 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)** which permits unrestricted use, distribution, and reproduction in any medium for non-commercial use provided the original author and source are credited.

**काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते ।**

**ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति ।।**[3]

एतदेवोक्तं पीयूषवर्षजयदेवेनापि –

**अङ्गीकरोति यः काव्यं शब्दार्थावनलंकृती ।**

**असौ न मन्यते कस्मादनुष्णमनलंकृती ।।**[4]

अग्निपुराणे अर्थालङ्कारशून्या सरस्वती विधवा इव प्रतिभाति इति प्रतिपाद्य काव्येऽलङ्कारस्य महत्त्वमङ्गीक्रियते। यथा – "अर्थालंकाररहिता विधवैव सरस्वती"[5] इति । वक्रोक्तिजीवितकारेण कुन्तकेन स्वीकृतं यत् –

**अलंकृतिरलंकार्यमपोद्धृत्य विवेच्यते ।**

**तदुपायतया तत्त्वं सालङ्कारस्य काव्यता ।।**[6]

एतेषां विनिवेशने कविः जागरूकः भवेदिति ध्वन्यालोककारः आनन्दवर्धनः कथयति । यथा –

**रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत् ।**

**अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः ।।**

**ध्वन्यात्मभूते शृङ्गारे समीक्ष्य विनिवेशितः ।**

**रूपकादिरलङ्कारवर्ग एति यथार्थताम् ।।**[7]

साहित्यदर्पणकारो लिखति – **"उत्कर्षहेतवः प्रोक्ताः गुणालङ्कार-रीतयः"**[8] इति । काव्ये रसो भवति आत्मा, अलङ्काराः कटककुण्डलादिवद् भवन्ति । यथा देहद्वारेण अङ्गद्वारेण वा कटककुण्डलादयः अलङ्काराः अङ्गिनः आत्मनो वा उपस्कारकाः भवन्ति, तथैव शब्दार्थद्वारा अनुप्रासाः उपमादयः अलङ्काराः उपस्कारकाः भवन्ति । एतेषां शब्दार्थालङ्काराणम् औचित्यपूर्णं विनिवेशनं स्यात् । ध्वन्यालोककारः लिखति –

**शृङ्गारस्याङ्गिनो यत्नादेकरूपानुबन्धवान् ।**

**सर्वेष्वेव प्रभेदेषु नानुप्रासः प्रकाशकः ।।**

3.काव्यादर्शः – 2/1

4.चन्द्रालोकः – **1/8**

5.अ.पु. – 343/12

6.वक्रोक्तिजीवितम् – 1/6

7.ध्वन्यालोकः – 2/16-17

8.सा.द. – **1/3**

**ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धनम् ।**

**शक्तावपि प्रमादित्वं विप्रलम्भे विशेषत: ।।**[9]

प्रकृतकाव्ये अलङ्काराणां समुचितविन्यास: विहित: प्रतिभाति। काव्येऽस्मिन् शान्तरस: प्रधान: वर्तते। अपि च शृङ्गारोऽपि अत्र वर्णित:। एतयो: रसयो: पोषकतायाम् अनुप्रासा: विघ्नकरा: इत्युच्यन्ते । किन्तु श्रीजयदेवस्य श्रीगीतगोविन्दे यथा अनुप्रासानां यमकानां बाहुल्यं दृश्यते न तथा अन्येषु काव्येषु। अपि च तत्र शृङ्गार: प्रधान: रस:। ध्वन्यालोककारस्य मतेन अनुप्रास: शृङ्गारे परिहर्तव्य: इति। अनुप्रास-शृङ्गारयो: मिश्रणस्य श्रीगीतगोविन्दस्य प्रसिद्धि: यथा वर्तते, तथैव तत्र शृङ्गाररसास्वादोऽपि भवति । तत्र अनुप्रास एव शृङ्गारं द्योतयति । अत्र विचार्योऽयं विषयो यत् अनुप्रास: द्विविध: - कठोरानुप्रास:, कोमलानुप्रासश्च । ओजोव्यञ्जकवर्णानां महाप्राणादि- वर्णानाम् अनुप्रास: कठोर:, अपि च प्रसादगुणगुम्फित: माधुर्यदायक: अनुप्रास: कोमल: । कोमलानुप्रास: प्रायश: सर्वेषु गीतिकाव्येषु प्राप्यते ।

प्रकृतकाव्ये गीतवीतरागे कोमलानुप्रास: बहुधा प्राप्यते । यथा -

**चण्डकिरणविधुमण्डलवियदिव कुण्डलिस्रवयुगभासम् ।**

**पिण्डितशशिसरसिजसमशुभगुणमण्डितवदनविलासम् ।।**[10]

अत्रान्त्यानुपास:, छेकानुप्रास:, लाटानुप्रास: वर्णित: । एवं प्रत्येकमपि गीतं गीतवीतरागे अनुप्रासविमण्डिं वर्तते । शृङ्गाररसे अस्योदाहरणं यथा -

**सुललितचन्दनपल्लवसङ्गमकोमलकमलसमीरे,**

**अलिकुलविमिलितकोकिलकूजितमेरुनिकुञ्जकुटीरे ।**

**व्यहरदतिसुरभिभरितवसन्ते,**

**नर्त्तनसक्तजनेन समं निजविरहिसुरस्यदुरन्ते ।।**[11]

अत्र अन्त्यानुप्रास:, श्रुत्यनुप्रास: अपूर्वसाङ्गीतिकमूर्च्छनां संसृज्य शृङ्गाररसास्वादे सहयोगं करोति ।

एवम् अनुप्रासं विहाय नैके उपमा, रूपकम्, अतिशयोक्ति:, उत्प्रेक्षा प्रभृतय: अर्थालङ्कारा अपि अत्र प्रयुक्तास्सन्ति । कानिचनोदाहरणानि अत्र प्रस्तूयन्ते ।

**उपमा**लङ्कारस्योदाहरणं यथा - गीतवीतरागस्य तृतीयप्रबन्धे प्रथम- श्लोके - **"इष्वाकारगिरौ"** इत्यत्र इषु: उपमानम्, गिरि: उपमेय:, आकार: साधारणधर्म: । इवेति उपमावाचक: शब्द: लुप्तस्तस्मात् लुप्तोपमाया: इदमुदाहरणम् ।

तथैव "शशधरसितसौधे"[12] इत्यस्मिन् वाक्यांशे शशधर: उपमानम्, सौधम् उपमेय:, सितत्वं साधारणधर्म: । इवेत्युपमावाचक: लुप्त: । तस्मात् लुप्तोपमाया: इदमुदाहरणम् ।

9.ध्वन्यालोक: - 2/14-15

10.गी.वी.रा.- 19/गी.1/प.3

11 .तत्रैव - 3/गी.1-प.1

**विरोधालङ्कारस्यो**दाहरणं यथा –

**इन्दुर्घर्मकरायते प्रियतमे वायुश्च हीरायते**

**लेपोऽपि ज्वलनायते कुसुमसन्मालाहि जालायते ।**

**आवासो गहनायते स्मरवशाद्देहोऽपि कारायते**

**हा कष्टं पतिविप्रयोगसमयः संवर्तवेलायते ।।**[13]

अस्मिन् उदाहरणे इन्दोः साधारणगुणः शीतलतं किन्तु अत्र घर्म- करौष्ण्यगुणस्य, तथैव वायोः, चन्दनलेपस्य, कुसुममालायाः, आवासस्य च विरुद्धधर्माः क्रमः हीरायते, ज्वलनायते, जालायते, गहनायते इत्येतेषां प्रतिपादनात् विरोधालङ्कारो भवति । अस्य लक्षणमुच्यते साहित्यदर्पणे –

**जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः ।।**

**क्रिया क्रियाद्रव्याभ्यां यद्द्रव्यं द्रव्येण वा मिथः ।**

**विरुद्धमिव भासेत विरोधोऽसौ दशाकृतिः ।।**[14]

**दृष्टान्तोपमालङ्कारयोः संसृष्टिः** यथा –

**सुकविविमलबुद्धिश्श्लिष्टमर्थं वृणोति**

**सुनयविहितराज्यं श्रीरवाप्नोति यद्वत् ।**

**नलिनसुभगनेत्रे मेलयिष्यामि तद्वत्**

**पतिमिह तव कन्ये ! मा कृथास्त्वं विषादम् ।।**[15]

अस्मिन् उदाहरणे प्रथमांशे – सुकवेः विमलबुद्धिः श्लिष्टमर्थं वृणोति, सुनयविहितं राज्यं श्रीः अवाप्नाति इति उच्यते । तथैव द्वितीयवाक्ये – हे कन्ये! तद्वत् अहं तव पतिं त्वया सह मेलयिष्यामि इति उल्लिख्यते । अत्र – बुद्ध्या साकं श्लिष्टार्थस्य वरणम्, सुनयविहितराज्येन साकं श्रियः प्राप्तिः इति उपमानांशस्य राज्ञा साकं कन्यायाः मेलनं नामोपमेयवस्तुनः बिम्वप्रतिबिम्ब-भावः प्रकाश्यते। अतः- **"चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः"** [16] इति कुवलयानन्दोक्तदृष्टान्तलक्षणाधारेण अत्र दृष्टान्तो नामालङ्कारः ।

अपि च अस्मिन् श्लोके "नलिनसुभगनेत्रे" इति पद्ये नलिनमुपमानम्, नेत्रम् उपमेयम्, सुभगत्वं सौन्दर्यं वा साधारणधर्मः, इवेत्युपमावाचकलुप्तः। तस्मात् लुप्तोपमायाः अपि इदमुदाहरणम्। एवमत्र दृष्टान्तोपमायाः संसृष्टिः ।

---

[12].गी.वी.रा.-4/श्लो.2

[13].तत्रैव - 4/श्लो.3

[14].सा.द. - 10/67-68

[15].गी.वी.रा. - 5/1

[16].कुवलयानन्दः - का.52

**परिकरानुप्रासयोः** संङ्करोऽलङ्कारस्योदाहरणं यथा –

**गत्वा तमभ्येत्य सुरेन्द्रलीलं**

**महाबलं भोगसुखातिलोलम् ।**

**उदग्रसौधाग्रगतं सुशीलं**

**ददर्श मन्त्री प्रतिबोधार्थम् ।।**[17]

अत्रान्त्यानुप्रासः, तथा सुरेन्द्रलील–सुशीलादिविशेषणानि सार्थकानि इतिकृत्वा परिकरालङ्कारः। साहित्यदर्पणे उक्तं च परिकरलक्षणम् – **"उक्तैर्विशेषणैस्साभिप्रायैः परिकरः मतः"**[18] इति । यथा च –

**गतभवमिलितां तां वज्रदन्तात्मजातां**

**विरहदहनदग्धां श्रीमतीं प्रौढकान्ताम् ।**

**त्वदभिगमनलीनालोचनं प्रार्थ्यमानां**

**सपदि सुभग ! गत्वा खण्डितां रक्ष भूप ! ।।**[19]

अत्र नायिकायाः प्रत्येकमपि विशेषणं साभिप्रायमस्ति । अतः परिकरः ।

अपि च –

**तं दृष्ट्वा चिरमाकलय्य पुलकव्याप्ताङ्गयष्टिर्मुदा**

**तुष्टावेति निजात्मरक्षणपरा तां पण्डितां श्रीमती ।**

**दुग्धक्षीरकुचप्रवेशनिपुणे ! स्त्रीरूपसन्धारित-**

**प्रज्ञे ! कौशलभूमिके ! मम पतेरन्वेषणे तत्परे ! ।।**[20]

अत्रापि सख्याः कृते दुग्धक्षीरकुचप्रवेशनिपुणे, स्त्रीरूपसन्धारितप्रज्ञे, कौशलभूमिके इति उक्तानि विशेषणानि पतेः अन्वेषणरूपकार्यस्य सफलतायै साभिप्रायाणि भवन्ति । अतः परिकरालङ्कारः ।

अपि च –

**मेरोरुत्तरदिक्स्थिते कुरुवरक्षेत्रे सुभोगाकरे**

**जायेते स्म हि दम्पती सुरसमौ बालार्कचञ्चत्प्रभौ ।**

**केयूरप्रमुखोद्धभूषणधरौ सुव्यक्तवाग्भूषणौ**

---

[17].गी.वी.रा. – 1/2

[18].सा.द. – 10/57

[19]. गी.वी.रा. – 6/1

[20].गी.वी.रा. – 7/श्लो.3

**पूर्वोपार्जितपुण्यपाकजनितान् भोगान् अभुक्तान् सदा ॥**

अस्मिन् उदाहरणे अनुप्रासः, उपमा, परिकरः इति त्रयाणाम् अलङ्काराणां सङ्करः दृश्यते। उत्तरदिक्स्थिते, जायेते इत्यन्त्यानुप्रासे एकधा साम्यम् । जनितान्, भोगान्, अभुक्तान् इत्यत्रान्ते बहुधा साम्यम् । मेरोः, उत्तरदिक्, कुरुवरक्षेत्रे, सुभोगाकरे, केयूरप्रमुख-भूषणधर इत्यादिषु शब्देषु रेफस्य बहुधा साम्यम् । तस्मादनुप्रासः ।

तथैव - दम्पत्योः कृते प्रदत्तानि सुरसमौ, बालार्कचञ्चत्प्रभौ, इद्धभूषण- धरौ, सुव्यक्तवाग्भूषणौ इत्यादीनि सर्वाणि विशेषणानि भोगानुकूल-तया साभिप्रायाणि सार्थकानि च । अतः परिकरालङ्कारः ।

तथैव, बालार्कचञ्चत्प्रभौ इत्यनेन बालार्कः उपमानम्, तौ दम्पती उपमेयौ,चञ्चत्प्रभत्वं साधारणधर्मः, इवेत्युपमावाचकः लुप्तः, अतः लुप्तोपमा ।

एवं प्रकारेण अनुप्रास-उपमा-परिकराणामत्र संसृष्टिः वर्तते ।

रूपकालङ्कारस्योदाहरणं यथा -

**विद्याव्याप्तसमस्तवस्तुविसरो विश्वैर्गुणैर्भासुरो**

**दिव्यश्रव्यवचःप्रतुष्टनृसुरस्सद्ध्यानरत्नाकरः ।**

**यः संसारविषाब्धिपारसुतरो निर्वाणसौख्यादरः**

**स श्रीमान् वृषभेश्वरो जिनवरो भक्त्याऽऽदरान् पातु नः ॥**[21]

अस्मिन् श्लोके “संसारविषाब्धिपारसुतरः” इत्यस्मिन् पदे संसारस्योपरि विषाब्धेः आरोपणात् रूपकालङ्कारः । एवमेव,

**इत्थं सुरोक्तं सकलं विधाय**

**स श्रीधरस्तत्र सुखाब्धितीर्णः ।**

**च्युत्वा ततः पूर्वविदेहभूमौ**

**पुत्रः पवित्रस्सुविधिर्बभूव ॥ २ ॥**[22]

अत्र सुखाब्धितीर्णः इत्यस्मिन् पदे सुखस्योपरि अब्धेः आरोपणाद्रूपकं नामालङ्कारः । एवं नैकत्र शान्तरसानुकूलरूपकालङ्कारः विविक्षितः कविना स्वीयपद्येषु, शृङ्गावर्णनासन्दर्भे च शृङ्गारोचितपदानि । तथैव “स्वयंप्रभावक्त्रसरोजभृङ्गः”[23]इत्यत्र स्वयंप्रभायाः मुखस्योपरि सरोजस्य आरोपणात्, तथैव च स्वयंप्रभायाः पत्युः उपरि भृङ्गस्यारोपणात् रूपकालङ्कारः ।

**उत्प्रेक्षालङ्कारस्योदाहरणं यथा –**

---

[21].गी.वी.रा. - 1/1

[22].तत्रैव - 10/2

[23].तत्रैव - 3/2

**तत्रैव चैत्यालयपट्टशाला-**

**मध्यासितं विभ्रममानसं तम् ।**

**व्योमावतीर्णं त्विव वज्रजङ्घं**

**सा पण्डिताऽपीत्थमुवाच वाणीम् ।।[24]**

वज्रजङ्घं व्योमावतीर्णमिव ददर्श इत्युत्प्रेक्षते ।

**उल्लेखालङ्कारस्योदाहरणं** यथा –

**गुरुर्विधाता गुरुरेव दाता**

**गुरुः स्वबन्धुर्गुणरत्नसिन्धु :।**

**गुरुर्विनेता गुरुरेव तातो**

**गुरुर्विमोक्षो हतकर्मपक्षः ।।[25]**

अत्र एकः गुरुः विधाता, दाता, स्वबन्धुः, गुणरत्नसिन्धुः, विनेता, तातः, विमोक्षः, हतकर्मपक्षश्चेति इत्येवं प्रकारेण बहुधा उल्लिखितः । अतः –

**क्वचिद्भेदाद्ग्रहीतॄणां विषयाणां तथा क्वचित् ।**

**एकस्यानेकधोल्लेखो यः स उल्लेख उच्यते ।।[26]**

इति साहित्यदर्पणोक्तलक्षणाधारेणात्रोल्लेखालङ्कारः ।

एवमन्येऽप्यलङ्काराः तत्र श्रीगीतवीतरागेऽस्मिन् विलसन्ति । अत्र दिङ्मात्रमेवादृहतम् । शोधार्थिभिः अन्यैरस्योपरि स्वतन्त्रां गवेषणां कर्तुं प्रभविष्यन्ति ।

**सहायकग्रन्थसूची**


1. गीतवीतरागः – सम्पादक डा.आ.ने.उपाध्ये, भारतीय ज्ञानपीठ,1972
2. काव्यप्रकाशः –सम्पादना ड.विपदभञ्जन पाल,संस्कृत पुस्तक भाण्डार, कलकाता।
3. साहित्यदर्पणः – व्याख्याकारः आचार्य शिवप्रसाद द्विवेदी,चौखम्वा सुरभारती प्रकाशन, वाराणसी ।
4. रसगङ्गाधरः – व्याख्याकारः डा. रामाधार शर्मा,भारतीय बुक कार्पोरेशन ।
5. कुवलयानन्दः–व्याख्याकार डा.भोलाशङ्कर व्यास,चौखम्वा विद्याभवन, वनारस ।
6. ध्वन्यालोकः–सत्यनारायण चक्रवर्ती,संस्कृत पुस्तक भाण्डार, कलकाता, 1998।
7. वक्रोक्तिजीवितम् – अञ्जलिका मुखोपाध्याय,सदेश, कलकाता ।


24.तत्रैव – 7/1

25 गी.वी.रा. – 9/5

26 गी.वी.रा. – 10/37